International Journal of Sanskrit Research 2021; 7(6): 241-246

International Journal of Sanskrit Research
अनन्ता

**ISSN: 2394-7519**
IJSR 2021; 7(6): 241-246
© 2021 IJSR
www.anantaajournal.com
Received: 21-09-2021
Accepted: 28-10-2021

**Dr. Dharmendra Das**
Assistant Professor, Department of Sanskrit Utkal University, Bhubaneswar, Odisha, India

**Corresponding Author:**
**Dr. Dharmendra Das**
Assistant Professor, Department of Sanskrit Utkal University, Bhubaneswar, Odisha, India

# ध्वनिपरिवर्त्तने काशिकावृत्तौ पठितोदाहरणानां भूमिका

**Dr. Dharmendra Das**

**सारांश:**
शास्त्रेष्वाद्यं व्याकरणम् । तत्र महर्षिणा पाणिनिना प्रणीतमिदं पाणिनीयं महाशास्त्रं भुवनविदितं सूत्रात्मकम् अष्टाध्यायीग्रन्थरत्नं राजते । पाणिनीयसूत्राणां व्याख्यानग्रन्थत्वेन प्रसिद्धा काशिकावृत्तिः । उदाहरणमण्डिता काशिकावृत्तिः । वैयाकरणयोः वामनजयादित्ययोः सम्मिलिता वृत्तिरियम् । सूत्रव्याख्यानावसरेऽत्र संगृहीतोदाहरणशब्दानां प्रासङ्गिकता साम्प्रतिकशोधजगति वर्त्तते एव । भाषावैज्ञानिकरूपेण काशिकावृत्तिकारयोः वामनजयादित्ययोः भूमिका शोधपत्रेऽस्मिन् चर्चिता वर्त्तते । आधुनिकभाषाविज्ञानदृष्ट्या काशिकावृत्तिगतोदाहरणानां तात्पर्याकलनं क्रियते यत्र काशिकावृत्तौ ध्वनिपरिवर्त्तननिष्ठोदाहरणानां भाषाशास्त्रीयविचारः प्रस्तूयते ।

**कूटशब्दाः** काशिका, सूत्रम्, उदाहरणम्, ध्वनिविज्ञानम्

## प्रस्तावना:

पाणिनीयव्याकरणस्य भाषावैज्ञानिकाध्ययनं शोधवाङ्मये नैवार्वाचीनम् । अस्यामेव अध्ययनपरम्परायां वामनजयादित्याभ्यां विरचितः काशिकावृत्त्याख्यः ग्रन्थः यत्र पाणिनीयसूत्राणां व्याख्यानावसरे संगृहीतानि उदाहरणपदानि भाषागवेषणाक्षेत्रेऽपि परमसहायकानि वर्त्तन्ते । पाणिनीयतन्त्रस्य भाषाशास्त्रीयमध्ययनं सुविहितम् । पातञ्जलमहाभाष्यं कात्यायनीयवार्त्तिकञ्चेति द्वे ग्रन्थरत्ने भाषाशास्त्रस्यैव । तत्पश्चात् भर्तृहरेः वाक्यपदीयं भाषागवेषणाजगति विज्ञानस्य स्थानं बिभर्त्ति । आधुनिकेऽपि भाषागवेषणाक्षेत्रे विज्ञानमिदं महोपकारकं भवति । भर्तृहरेरनन्तरं संस्कृतभाषायाः वैज्ञानिकमध्ययनं वृत्तिग्रन्थेषु परिलक्ष्यते । पाणिनीयतन्त्रस्य भाषाशास्त्रीयव्याख्यानार्थं वामनजयादित्यभ्यां सततं चेष्टितम् । सूत्रव्याख्यानदशायां संगृहीतोदाहरणानि भाषाविज्ञानतत्त्वोपेतानि । आधुनिके भाषाविज्ञानक्षेत्रे येषामुदाहरणशब्दानां तात्त्विकविवेचनं प्रासङ्गिकतां भजते । तेषां शब्दानां प्रवृत्तिनिमित्तमधिगम्यैव पाणिनीयव्याकरणं लोके प्रवर्त्तते ।

भाषायाः सुरक्षायै भाषावैज्ञानिकाः एव यत्नशीलाः भवन्ति । काशिकायां वृत्तौ सहस्राधिकाः उदाहरणशब्दाः स्थानिताः । येषां शब्दानां वैज्ञानिकत्वञ्च सूत्रव्याख्यानावसरे उदाहरणरूपेण सुविहितम् । इत्थं काशिकागतोदाहरणानां भाषाविज्ञानदृष्ट्या अध्ययनेन साकं भाषावैज्ञानिकरूपेण च वामनजयादित्ययोः भूमिकां प्रतिपादयितुं शक्यते ।

## आधुनिकभाषाविज्ञानस्य स्वरूपम्

आधुनिके युगे भाषाविज्ञानस्य नैकाः नवीनाः शाखाः समुपलभ्यन्ते । परन्तु प्राचीनकाले भाषाविज्ञानस्य स्वरूपं तथा विकसितं नासीत् । व्याकरणमूलकमेव भाषाविज्ञानं प्रथितमासीत्। तुलनात्मकं व्याकरणमेव भाषाविज्ञानत्वेन परिचितमासीत्। 'साधुत्वज्ञानविषया सैषा व्याकरणस्मृतिः' इति भर्तृहरिवचनानुसारं व्याकरणं शब्दसाधुत्वबोधविषयकं भवति। [1] भाषाविज्ञानं तु भाषायाः तौलनिकमध्ययनं करोति। विश्वेस्मिन् व्यवहृतानां भाषाणां सामग्रिकमध्ययनमस्ति आधुनिकभाषाविज्ञानस्य स्वरूपम् । परं व्याकरणभाषाविज्ञानयोः सम्बन्धः शाश्वतः इति कथनेन नास्ति दोषः । आधुनिकाः भाषावैज्ञानिकाः भाषायाः सांस्कृतिकमध्ययनं कुर्वन्ति । तत्र संस्कृतभाषा सर्वोत्तमा भवति । संस्कृतव्याकरणस्यानर्घसाधनरूपा काशिकावृत्तिः वैज्ञानिकतथ्यमण्डिता वर्त्तते। अत्र संगृहीतानाम् उदाहरणशब्दानाम् आधुनिकभाषाविज्ञानदृष्ट्या अध्ययनं साम्प्रतिककाले भाषाविज्ञानवाङ्मये प्रासङ्गिकतां भजते । ध्वनिविज्ञानदृष्ट्या काशिकावृत्तिगतोदाहरणानां समीक्षा भाषाविज्ञानवाङ्मये नवीनां दिशां जनयति ।

## प्रस्तुताध्ययनस्य परिसरः प्रासङ्गिकता च

काशिकावृत्तौ संगृहीतान्युदाहरणानि प्राचीनानि क्रमागतान्येवोपलभ्यन्ते । परम्परागतत्वात् काशिकोदाहरणैः परम्परायाः रक्षा जायते । अस्यां प्रतिसूत्रमनुवृत्तिः, वृत्तिः, उदाहरणानि, प्रत्युदाहरणानि च शङ्कासमाधाननिर्देशपुरःसरम् उपलभ्यन्ते । भाषातात्त्विकदृष्ट्या च काशिकाख्यः ग्रन्थोऽयमतीव मूल्यवानिति विदुषां मतम् । प्रो. वेल्वकरमहोदयेन च वैशिष्ट्यमिदं काशिकायाः प्रशसिंतं समर्थितञ्च ।[2]

## ध्वनिविज्ञानम्

सकला हि भाषा ध्वन्याश्रिता । आधुनिकभाषाविज्ञानशास्त्रे ध्वनीनां विशिष्टाध्ययनं ध्वनिविज्ञानमिति शाखैका विद्यते । संसारेऽस्मिन् कस्याश्चिदपि भाषोत्पत्तेः मूलत्वेन ध्वनिरेव स्वीक्रियते । ध्वनीनां मौलिकं सर्वप्राचीनं वर्गीकरणं स्वरव्यञ्जनात्मकं वर्त्तते । इत्थञ्च ध्वनेः भेदद्वयं स्वीक्रियते। स्वरः व्यञ्जनञ्चेति । काशिकायां 'सौवरः' इत्येकमुदाहरणं लभ्यते । स्वरमधिकृत्य कृतो ग्रन्थः सौवरः। [3] 'स्वौवरः' इति प्राचीनः ध्वनिविज्ञानपरकः ग्रन्थः स्यात् यत्र स्वरध्वनिविषयस्य अध्ययनं प्रवर्तितः स्यात् । प्रत्याहारसूत्ररूपेण संस्कृतध्वनीनां वर्गीकरणं भगवतः पाणिनेः वैज्ञानिकत्वं द्योतयति । अच्प्रत्याहारेण स्वरध्वनीनां हल्प्रत्याहारेण च व्यञ्जनध्वनीनां ग्रहणं भाषावैज्ञानिकतायाः परिचायकमस्ति । पाणिनीयव्याकरणोपदिष्टाः ध्वनयः काशिकोदाहरणेषु प्रतिफलिताः दृश्यन्ते । ध्वनिविज्ञानस्य तत्त्वानि नियमाश्च काशिकोदाहरणेषु सन्निविष्टाः सन्ति । अत्र ध्वनितत्त्वनिष्ठानामुदाहरणानां पर्यालोचना विधीयते ।

## ध्वनिविकारः

ध्वनिपरिवर्त्तनं ध्वनिविकारः वा ध्वनिविज्ञानशास्त्रे वैशिष्ट्यपूर्णं स्थानं धत्ते । भाषायाः परिवर्तनस्यान्यतमहेतुत्वेन ध्वनिपरिवर्त्तनं परिगण्यते । निरुक्तकारेण यास्काचार्येण ध्वनिविकारस्य पञ्च हेतवः सिद्धान्तिताः । ते सन्ति वर्णागमः,

[1] भर्तृहरिकृतं वाक्यपदीयम् -१/१४१

[2] द्रष्टव्यः - Sometimes KāŚikā gives us information which we cannot obtain from any source.- Prof. S.K. Belvalkar, System of Sanskrit Grammar, p/37

[3] काशिकावृत्तिः - ७.३.४

वर्णविपर्ययः, वर्णनाशः, धात्वर्थातिशयेन योगश्चेति ।[4] काशिकाकारेणापि निरुक्तकारस्य मतमिदं 'पृषोदरादीनि यथोपदिष्टम्' इति सूत्रस्य व्याख्यानावसरे समुद्धृतम् । यथा-

वर्णागमो वर्णविपर्ययश्च द्वौ चापरौ वर्णविकारनाशौ । धातोस्तदर्थातिशयेन योगस्तदुच्यते पञ्चविधं निरुक्तम् ।।[5] निरुक्तशास्त्रे येषां शब्दानां व्युत्पादनं क्रियते, तेषां शब्दानां साधुत्वं पृषोदरादित्वादेव इष्यते । तदर्थमेव काशिकायां श्लोकोऽयमवतारितः । ध्वनिपरिवर्त्तनस्य कारणद्वयं भाषावैज्ञानिकैः सिद्धान्तितम् । आभ्यन्तरकारणं बाह्यकारणञ्चेति । ऐतिहासिक-सांस्कृतिक-साहित्यिक-वैज्ञानिक-वैयक्तिककारकाणि बाह्यकारणान्तर्गतानि । भावातिरेकः, बलम्, अपूर्णानुकरणम्, प्रयत्नलाघवश्चेत्येतानि आभ्यन्तरकारणानि सन्ति । तत्र आभ्यन्तरकारणेषु प्रयत्नलाघवः ध्वनिविकारे प्रमुखां भूमिकां निर्वाहयति । प्रयत्नलाघवसम्पादनार्थं सर्वाधिकं ध्वनिपरिवर्त्तनं भवतीति भाषावैज्ञानिकैः समर्थ्यते । प्रयत्नलाघवार्थं वक्ता वर्णागमादीन् उपायान् अवलम्बते येन शब्दोच्चारणे सौविध्यं सारल्यञ्च सम्भवति । गच्छता कालेन तादृशाः शब्दाः भाषायां स्थायित्वं प्राप्नुवन्ति येन मूलध्वनिः विकारं प्राप्य भाषायां प्रयुक्तः भवति। काशिकावृत्तौ प्रयत्नलाघवोपायाः सोदाहरणं प्रतिपादिताः वर्त्तन्ते ।

**वर्णागमः**

अपूर्वस्य वर्णस्यागमः वर्णागमः । यथा-कुञ्जरः । कौ जीर्यते इति कुञ्जरः । अत्र कुशब्दस्य नुगागमः क्रियते । एवञ्च अन्या आस्था अन्यदास्था । अन्य आस्थितः अन्यदास्थितः । अन्य उत्सुकः अन्यदुत्सुकः । अन्या ऊतिः अन्यदूतिः । अन्यः कारकः अन्यत्कारकः । अन्यो रागः अन्यद्रागः । अन्यस्मिन् भवः अन्यदीयः । अत्रोदाहरणेषु दुगागमः भवति । येन अपूर्वस्य दवर्णस्य आगमात् ध्वनिविकारः जायते ।[6] ऊर्ध्वं खमस्येति उलूखलम् । खम् बिलमित्यर्थः । ऊर्ध्वखशब्दयोः स्थाने उलू, खल इत्येतावादेशौ भवतः ।[7]

**वर्णविपर्ययः**

वर्णस्थानव्यत्यासः वर्णविपर्ययः । यथा- सिंहः ।[8] हिसि हिंसायाम् इति धातुः । हिनस्तीति सिंहः । अत्र पचाद्यचि प्रत्यये कृते हकारसकारयोः स्थानव्यत्यासः भवति। हिंसः इति प्रयोक्तव्ये सिंहः इति प्रयोगेण प्रयत्नलाघवस्तु भवति परमनेन ध्वनिविकारः जायते ।

**वर्णविकारः**

वर्णस्य रूपान्तरापत्तिः वर्णविकारः उच्यते । यथा-षोड़न् । षड् दन्ता यस्येति षोडन् । अत्र षकारस्योत्वरूपापत्तिः, दकारस्य च डकाररूपापत्तिः । एवञ्च षोडश इत्युदाहरणं द्रष्टव्यम् । षट् च दश च षोडश । अत्रापि दकारः डकारेण परिवर्त्तितः। वाड्वालिः इत्युदाहरणं ध्वनिविपर्ययस्य प्रकृष्टतमं काशिकोदाहरणम् । वाचं वदतीति वाग्वादः । वाग्वादस्यापत्यं वाड्वालः । अत्रोदाहरणे चध्वनिः डध्वनिरूपेण दध्वनिश्च लध्वनिरूपेण परिवर्त्तितौ ।[9] वारिवाहकः इति प्राप्ते बलाहकः इति प्रयोगः ध्वनिविकारं जनयति । एवञ्च राजाहः इति प्रयोक्तव्ये राजघः इति प्रयोगः दृश्यते। पाणिघः, ताडघः, राजघः इत्येतेषु उदाहरणेषु हध्वनेः घध्वनिरूपेण परिवर्त्तनं जातम्।[10] 'जायाशब्दस्य जम्भावः दम्भावश्च निपात्यते' इति कथनं काशिकायां प्राप्यते ।[11] यत्र 'जम्पती' इति पदे

---

[4] वर्णागमो वर्ण-विपर्ययश्च द्वौ चापरौ वर्णविकारनाशौ । धातोस्तदर्थातिशयेन योगस्तदुच्यते पञ्चविधं निरुक्तम् ।। यास्कप्रणीतं निरुक्तम्, प्रथमोऽध्यायः, पृ.२

[5] काशिकावृत्तिः - ६.३.१०९

[6] दुगागमोऽविशेषेण वक्तव्यः कारकच्छयोः । षष्ठीतृतीययोर्नेष्ट आशीरादिषु सप्तसु ।। - काशिकावृत्तिः - ६.३.९९

[7] काशिकावृत्तिः - ६.३.१०९

[8] काशिकावृत्तिः - ५.३.१००

[9] वाचो वादेर्डत्वं च ल्भावश्चोत्तरपदस्येञि प्रत्यये भवति ।- काशिकावृत्तिः - भाग.८,पृ.१११

[10] काशिकावृत्तिः - ३.२.५५

[11] काशिकावृत्तिः - २.२.३१

विद्यमानः जध्वनिः दध्वनिना रूपान्तरितः भवति। अत्र ध्वनिपरिवर्त्तनस्य कारणं सांस्कृतिकं साहित्यिकं वा स्वीकर्त्तव्यम् ।

**वर्णनाशः**

वर्णस्य लोपः वर्णनाशः उच्यते । यथा- पृषोदरः । पृषद् उदरं यस्य सः पृषोदरः । अत्र तकारस्य लोपः जातः । जीवनस्य मूतो जीमूतः । जीवनं नाम जलम् । मूतो भाजनमित्यर्थः । जलस्य भाजनम् इत्यर्थः जीमूतशब्देन बुध्यते । अत्र वनशब्दस्य लोपः भवति ।[12] उदकशब्दस्य उद इत्ययमादेशः भवति । लोहितोदकः इति प्राप्ते लोहितोदः । नीलोदकः इति प्राप्ते नीलोदः । क्षीरोदकः इति प्राप्ते क्षीरोदः । उदकस्य वासः उदवासः। उदकस्य वाहनः उदवाहनः । उदकं धीयतेऽस्मिन्नित्युदधिः। उदकस्य कुम्भः उदकुम्भः । उदकस्य बिन्दुः उदकबिन्दुः इति प्राप्ते उदबिन्दुः । उदकेनौदनः उदकौदनः इति प्राप्ते उदौदनः। उदकं बिभर्तीति उदभारः। उदकभारः इति प्राप्ते उदभारः । उदकं हरतीति उदहारः । उदकहारः इति प्राप्ते उदहारः । उदकं गाहत इति उदगाहः । उदकगाहः इति प्राप्ते उदगाहः । सर्वत्र कध्वनेः लोपः जातः ।[13] रञ्जयति वस्त्राणीति रजकः इत्युदाहरणं 'शिल्पिनि ष्वुन्' [14] इति सूत्रस्य व्याख्यानावसरे प्राप्यते । अत्र 'रञ्जेरनुनासिकलोपश्च' इति कथनेन ध्वनिपरिवर्त्तनं स्वभावसिद्धं परिलक्ष्यते । यतः 'रञ्जकः' इति शब्दे प्रयत्नलाघवार्थमेव अनुनासिकस्य ञध्वनेः लोपं विधाय 'रजकः' इति प्रयोगः क्रियते ।

**अर्थातिशयः**

अर्थविशेषः अर्थातिशयः कथ्यते । प्रसिद्धात् अर्थात् अर्थान्तरं धातुसम्बन्धेन भवति । यथा- मयूरः । मह्यां रौतीति मयूरः । अत्र रौते रमणेनार्थेनातिशयेन योगः । शवानां शयनं श्मशानम्। अत्र शवशब्दस्य श्मादेशः शयनशब्दस्य च शानादेशः दृश्यते । ध्वनिश्च परिवर्त्तितः । पिशिताशः इत्यस्य स्थाने पिशाचः इति प्रयोगः । पिशितं नाम मांसम् । पिशितम् अश्नातीति पिशिताशः । पिशिताशशब्दयोः स्थाने यथाप्रचलितं पिशाचः इति शब्दः लोके व्यवहृतः । किञ्च हृदयं लिखतीति हृल्लेखः। हृदयस्य प्रियं हृद्यम् । हृदयस्येदं हार्द्दम् । हृदयस्य लासो हृल्लासः । एतेषूदाहरणेषु हृदयस्य 'हृत्' इत्ययमादेशः भवति ।[15]

**अपूर्णानुकरणम्**

अनुकरणं भाषाशिक्षणस्य प्रमुखोपायत्वेन भाषाविशेषज्ञैः स्वीक्रियते । वाग्यन्त्रस्य वैविध्येन श्रवणेन्द्रियस्य दोषेन वा भाषायाः अनुकरणं पूर्णतां न प्राप्नोति । येन ध्वनिविकारः जायते । 'ऋलृक्'[16] इति सूत्रे लृध्वनेः याथार्थ्यं दर्शयितुं काशिकावृत्तौ ऋतकः, लृतकः इत्येवं पदद्वयमुदाह्रियते । काचित् कुमारी वाग्यन्त्रस्य वैकल्यात् 'ऋतकः' इति प्रयोक्तव्ये 'लृतकः' इति प्रयुङ्क्ते । अनेन ध्वनिपरिवर्त्तनं भवति । अपरः कश्चित् प्रसङ्गेऽस्मिन् कथयति यत्, 'कुमार्य्लृतक इत्याह' इति । ध्वनिविज्ञानसिद्धान्ते ध्वनिपरिवर्त्तनस्य कृते कारणद्वयं समाश्रीयते । आभ्यन्तरकारणं वाह्यकारणञ्चेति । वाग्यन्त्रस्य वैकल्यात् यः ऋध्वनेः विकारः परिलक्ष्यते, तदिदं ध्वनिपरिवर्त्तनस्याभ्यन्तरकारणमिति स्वीकर्त्तव्यम् । वस्तुतः यण्विधानार्थं लृध्वनेः अन्तर्भावः संस्कृतभाषायां विद्यते ।

**अव्यक्तानुकरणम्**

'अव्यक्तानुकरणाद् द्व्यजवरार्धादनितौ डाच्' [17] इति सूत्रस्य व्याख्यानावसरे काशिकायाम् अव्यक्तध्वनिः

---

[12] काशिकावृत्तिः - ६.३.१०९

[13] काशिकावृत्तिः - ६.३.५७-६०

[14] काशिकावृत्तिः - ३.१.१४५

[15] काशिकावृत्तिः - ६.३.५०

[16] 'ऋतक' इति प्रयोक्तव्ये शक्तिवैकल्यात् कुमारी 'लृतकः' इति प्रयुङ्क्ते, तदन्योऽनुकरोति-कुमार्य्लृतक इत्याह - काशिकावृत्तिः - माहेश्वरसूत्र.२

[17] यत्र ध्वनावकारादयो वर्णा विशेषरूपेण न व्यज्यन्ते सोऽव्यक्तः । - काशिकावृत्तिः - ५.४.५७

व्याख्यातः यस्मिन् अकारादयः ध्वनयः स्पष्टरूपेण न अभिव्यज्यन्ते, ते अव्यक्तध्वनयः उच्यन्ते । अस्य ध्वनेः अनुकरणम् अव्यक्तानुकरणमुच्यते । पटत् पटत् इति ध्वनेः अनुकरणम् अव्यक्तानुकरणस्य उदाहरणं काशिकायां प्राप्यते । यथा- पटपटाकरोति, पटपटाभवति, पटपटास्यात् । एवञ्च दमत् दमत् इति ध्वनेः अनुकरणं क्रियते चेत् अव्यक्तानुकरणं भवति । यथा- दमदमाकरोति, दमदमाभवति, दमदमास्यात् । अनेन ध्वनिविकारः जायते ।

**वर्णादेशः**

ध्वनिपरिवर्त्तने वर्णादेशः इति प्रसिद्धं कारणं भाषावैज्ञानिकैः स्वीक्रियते । वर्णस्यादेशः वर्णादेशः । भाषाविज्ञानशास्त्रे नामान्तरेण समीकरणमित्युच्यते । द्वयोः भिन्नध्वन्योः एकस्मिन् स्थले वर्त्तमानत्वात् समीकरणबलेन ध्वनिपरिवर्त्तनं जायते । संस्कृतव्याकरणे समीकरणप्रक्रियायां हेतुद्वयं प्राप्यते । यथा- परसवर्णादेशः, पूर्वसवर्णादेशश्चेति । शम् किता इति प्रयोक्तव्ये शङ्किता इति प्रयुज्यते । एवञ्च कुण्डिता, नन्दिता, कम्पिता, अग्निचिल्लुनाति, सोमसुल्लुनाति इत्येतानि उदाहरणानि परसवर्णादेशभूतानि ।[18] वाग् हसति इति प्रयोक्तव्ये वाग्घसति इति प्रयोगः पूर्वसवर्णादेशपरकः । एवञ्च श्वलिड् ढसति, अग्निचिद्धसति, सोमसुद्धसति, त्रिष्टुब्भसति इत्येतानि उदाहरणानि वर्णादेशस्य प्रकृष्टोदाहरणानि ।[19]

**प्राप्तसिद्धान्ताः**

संस्कृतभाषाविश्लेषणस्य अष्टाध्यायीग्रन्थः सर्वोत्तमः उपायः । पाणिनीयसूत्राणां व्याख्यानावसरे काशिकावृत्तौ पठितोदाहरणानि ध्वनिविज्ञानविचारेऽपि सहायकभूतानि भवन्ति । यथा ध्वनितत्त्वविशेषज्ञैः ग्रासमानग्रिमवर्नरप्रभृतिभिः पाश्चात्यैः भाषावैज्ञानिकैः ध्वनिनियमाः प्रतिपादिताः तथैव भगवता पाणिनिना संस्कृतध्वनिविश्लेषणपरकाः सूत्ररूपाः नियमाः प्रणीताः । उपर्युक्तानि व्याकरणशास्त्रीयोदाहरणानि भाषातात्त्विकदृष्ट्या विचारितानि । संस्कृतभाषिकध्वनीनां परिवर्त्तने नियमभूतानि पाणिनिप्रणीतानि सूत्राणि । व्याकरणं नाम शब्दशास्त्रम् । शब्दं परिभाषमाणः महाभाष्यकारः पतञ्जलिरपि ध्वनिविज्ञानसम्मतं विचारं प्रकटयति । तेन हि प्रतीतपदार्थको लोके ध्वनिः शब्द इत्युच्यते ।[20] वैयाकरणैः स्फोटः शब्दत्वेनाङ्गीक्रियते । स्फुटति व्यक्तीभवति अर्थो यस्मात् सः स्फोटः । तत्र ध्वनयः व्यञ्जकाः भवन्ति स्फोटस्तु तद्व्यङ्ग्यः । एवञ्च निर्वचनशास्त्रज्ञः यास्काचार्यः ध्वनिनियमस्य विश्लेषकः इति कथनेन नास्ति शङ्कावकासः । भाषा प्रवाहमयी भवति । देश-काल-परिस्थितिवशात् ध्वनीनां परिवर्त्तनं संलक्ष्यते । परं संस्कृतभाषिकध्वनीनां परिवर्त्तने भगवता पाणिनिना प्रणीताः नियमाः वैज्ञानिकाः प्रतीयन्ते । यत्र पाश्चात्यः ध्वनिनियमाः गच्छता कालेन सह परिवर्त्तनशीलाः तत्र भारतीयध्वनिनियमाः शृङ्खलाबद्धाः परिदृश्यन्ते । उदाहरणानाम् विमर्शेन ज्ञायते यत् वामनजयादित्यौ ध्वनितत्त्वविचारसम्पन्नौ । संस्कृतध्वनीनां सुरक्षायै भगवतः पाणिनेः भाषावैज्ञानिकरूपेण च वामनजयादित्ययोः भूमिका प्रशंसनीया भवति ।

**उपसंहारः**

काशिकावृत्तौ पाणिनीयसूत्राणां विवेचनावसरे प्रदत्तोदाहरणानि सर्वशास्त्रोपकारकाणीति निर्णयः । उदाहरणान्येव पाणिनीयसूत्राणां क्रमशः प्रवृत्तिं बोधयन्ति । अत एव पाणिनीयव्याकरणे व्यावहारिकदृष्ट्या प्रवेशः काशिकोदाहरणद्वारैव साध्यः । किञ्चोदाहरणप्रत्युदाहरणैः सूत्रार्थबोधनस्येयं काशिकापद्धतिः साम्प्रतिककाले संस्कृतव्याकरणशिक्षणे परमसहायिका भविष्यति । काशिकोदाहरणानाम् भाषावैज्ञानिकं वैशिष्ट्यं बहुमुखिशोधक्षेत्रेषु मार्गं प्रस्तोतुमलमिति नातिवचनम्

[18] काशिकावृत्तिः - ८.४.५८-६०

[19] काशिकावृत्तिः - ८.४.६२

[20] व्याकरणमहाभाष्यम् -पस्पशाह्निकम्

। संस्कृतं विहाय इतरभाषागवेषणाक्षेत्रे प्रवृत्तानां गवेषकानां कृतेऽपि काशिकाध्ययनं फलदायि भवेत् । काशिकोदाहरणानां विशिष्टाध्ययनेन भारतस्य महनीयाया: संस्कृताध्ययनाध्यापनपरम्पराया: पुनरुद्धार: भवेत् ।

## सन्दर्भसूची


1. Agrawala VS. India as Known to Pāṇini, University of Lucknow, Lucknow, 1953.
2. Apte Vaman Shivram. Sanskrit-Hndi-English Dictionary, Ed. by Uma Prasad Pandey, Kamal Prakasan, New Delhi, 2003.
3. Belvalkar SK. An Account of the Different Existing System of Sanskrit Grammar, 2nd Rev. Edn., Oriental Publishers, Amritsar, 1980.
4. Dash Radhamadhab. (Ed.), Idioms in Kāśikā, Pratibha Prakashan, Delhi, 1995.
5. Grimal F (Ed), Venkataraja Sarma V (Ed.), Srivatsankacharya V (Ed.), Lakshminarasimham S. (Ed.). Pāṇinīyavyākaraṇodāharaṇakośaḥ (Paninian Grammar through its Example), Rashtriya Sanskrit Vidyapeetha, Tirupati. 2007;2:3-3.
6. Kielhorn F (Ed.), Abhyankar, Kashinath Yasudev. The Vyākaraṇa Mahābhāṣya of Patanjali, Third Edition, Pune. 1972.
7. Mishra Shashibhusan (Ed.). Linguistic Analysis of Pāṇinian Grammar, Banaras Mercantile Co., Kolkata, 2012.
8. Tripathy Jaysankarlal (Ed.), Malaviya, Sudhakar (Ed.). Kāśikā of Jayāditya & Vāmana, Tara Book Agency, Varanasi, 1984, I-X.